R5M6M3

8 मम दिनचर्या

एषा का ?



कः समयः ?






(घटीं दृष्ट्वा उपर्युक्त-रिक्तस्थानेषु समयं लिखतु।)


6:05

पञ्चाधिकषड्वादनम्


11:10

दशाधिक-एकादशवादनम्


7:55

पञ्चोन-अष्टवादनम्


6:50

दशोन-सप्तवादनम्

कः समयः ?






मम दिनचर्या

अहं प्रतिदिनं षड्वादने उत्तिष्ठामि । षड्वादनतः सार्धषड्वादनपर्यन्तं दन्तधावनं स्नानं च करोमि । सार्धषड्वादनतः सप्तवादनपर्यन्तं योगासनं करोमि । तदनन्तरं दुग्धं पिबामि अल्पाहारं च करोमि ।











मम माता गृहकार्यं करोति । अहं तां साहाय्यं करोमि । नववादनतः दशवादनपर्यन्तम् अध्ययनं करोमि। सार्ध-एकादशवादने भोजनं करोमि। सपादद्वादशवादने विद्यालयं गच्छामि । तत्र अहं विविधान् विषयान् पठामि ।

सायं षड्वादने अहं गृहम् आगच्छामि । सपादषड्वादनतः सपादसप्तवादनपर्यन्तम् अहं क्रीडामि । तदनन्तरम् अहं सायं प्रार्थनां करोमि । सार्धसप्तवादनतः सार्धअष्टवादनपर्यन्तं पुस्तकं पठामि । सार्ध - अष्टवादने भोजनं करोमि । नववादनतः सार्धनववादनपर्यन्तं दूरदर्शनं पश्यामि । सार्ध नववादनतः दशवादनपर्यन्तं जनन्या तातेन च सह वार्तालापं करोमि । दशवादने शयनं करोमि ।



टिप्पणी

तः થી **पर्यन्तम्** સુધી **उत्तिष्ठामि** ઊઠું છું. **दन्तधावनम्** દાતણ કરવું તે **दुग्धम्** દૂધ **अल्पाहारः** નાસ્તો **दूरदर्शनम्** ટેલિવિઝન **जननी** માતા **तातेन सह** પિતાની સાથે

F3T5Y7

स्वाध्यायः

1. નીચેના શબ્દોનું મોટેથી ઉચ્ચારણ કરો :

उत्तिष्ठामि, षड्वादनतः, दन्तधावनम्, तदनन्तरम्, जनन्या, वार्तालापम् ।

2. પોતાની દિનચર્યાને લગતા પ્રશ્નોના ઉત્તર આપો :

(1) भवान् कदा उत्तिष्ठति ?

(2) भवती कति वादने प्रार्थनां करोति ?

(3) भवान् कदा विद्यालयं गच्छति ?

(4) भवती कदा क्रीडति ?

(5) भवान् कति वादने गृहकार्यं करोति ?

3. કોષ્ટક પરથી વાક્યો બનાવો :

अ	ब	क
प्रातः	षड्वादने	अल्पाहारम्
	नववादने	उत्थानम्
मध्याह्ने	द्वादशवादने	पठनम्
सायम्	षड्वादने	भोजनम्
	सप्तवादने	कथाश्रवणम्
रात्रौ	अष्टवादने	अध्ययनम्
	दशवादने	शयनम्

4. ચિત્ર જોઈને સમય નોંધીને વાક્યો લખો :



_____

_____



छात्राः एकादशवादने प्रार्थनां कुर्वन्ति।





5. ઉદાહરણ પ્રમાણે તમારી દિનચર્યાનાં વાક્યો બનાવો :

ઉદાહરણ : अहं प्रातः षड्वादनतः सप्तवादनपर्यन्तं नित्यक्रियां करोमि ।

(1) अहं _____ योगाभ्यासं करोमि ।

(2) अहं प्रातः नववादनतः सार्ध नववादनपर्यन्तं _____ करोमि ।

(3) अहं _____ अध्ययनं करोमि ।

(4) अहं सायं षड्वादनतः सप्तवादनपर्यन्तं _____ करोमि ।

6. ઉદાહરણ પ્રમાણે વાક્યો બનાવો :

બસનું સમયપત્રક

રૂટ	આગમન	નિર્ગમન
उपलेटा – राजकोट	९:००	९:१०
पोरबन्दर – अमदावाद	१०:१०	१०:२०
बाटवा – वडोदरा	१२:१५	१२:३०
जामजोधपुर – जसदण	१५:०५	१५:१०
कोलकी – धोराजी	१६:३०	१६:३५

उदाहरण :

उपलेटा–राजकोट–लोकयानम् ९:०० वादने आगच्छति एवं ९:१० वादने गच्छति ।

7. तमारी दिनचर्यानुं कथन अने लेखन करो.

भवान् जानाति किम् ?

श्रीमद् भगवद्गीतायाम् अष्टादश अध्याया: सन्ति ।

श्रीमद् भगवद्गीता महाभारते भीष्मपर्वणि अस्ति ।

श्रीमद भगवद्गीतायां सप्तशतं श्लोका: सन्ति ।

महाभारतस्य युद्धं अष्टादश दिनानि पर्यन्तं प्राचलत् ।

चत्वार: मठा: सन्ति–शृंगेरीमठ: शारदामठ:, ज्योतिर्मठ:, गोवर्धनमठ: ।

गायत्रीमन्त्रस्य मन्त्रद्रष्टा विश्वामित्र: अस्ति ।